**दिनाङ्क : - 14.01.2025**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री</u>**

प्रधानमन्त्री नरेन्द्रमोदी नवदिल्ल्याम् अद्य मिशनमौसम इत्येतस्य ऋतुसम्बद्धस्य अभियानस्य शुभारम्भं करिष्यति। यस्योद्देश्यं देशे समुचितऋतु - दशाया: अनुमानम् अपि च ऋतुं प्रति सज्जिकरणमिति वर्तते। श्रीमोदी भारतमण्डपमे भारतीय-ऋतु-विज्ञान-विभागस्य पञ्चाशदधिकैकशततमे स्थापनादिवसावसरे अस्य अभियानस्य आरम्भं करिष्यति। मिशनमौसम इत्यस्य अभियानस्य लक्ष्यम् अत्याधुनिक-ऋतुदशा-निरीक्षण-तन्त्रज्ञानानि प्रणाल्यश्च विकसिता: कृत्वा स्वलक्ष्यप्राप्ति: इति वर्तते।

**<u>नेटपरीक्षासूचना</u>**

राष्ट्रिय-परीक्षणाभिकरणेन एन.टी.ए. इत्यनेन चतुर्विंशत्यधिक द्विसहस्रतमवर्षीया यू.जी. नेटपरीक्षा स्थगिता। या श्व: निर्धारितासीन्।

एकस्मिन् वक्तव्ये एन.टी.ए. इत्यनेन सूचितं यत् जनवरीमासे पञ्चदशदिनाङ्के पोङ्गल-मकरसंक्रान्ति- इत्यादिनाम् उत्सवानां कारणेन परीक्षां स्थगयितुं निवेदनानि समायातानि। परीक्षाया: नूतन: दिनाङ्क: श्व: घोषयिष्यते। अपि च जनवरीमासे षोडशदिनाङ्के निर्धारिता परीक्षा पूर्वनियोजितानुसारि सञ्चालिता भविष्यति इति।

**<u>सिंङ्गापुर राष्ट्रपति:</u>**

सिङ्गापुरदेशस्य राष्ट्रपति: थर्मन्-षण्मुगरत्नम् इत्यसौ अद्यारभ्य पञ्चदिवसीययात्रायै भारतं प्रत्यागच्छतीति। तेन सह एकम् उच्चस्तरीयमण्डलम् आयाति यस्मिन् मन्त्रिण: सांसदा: अधिकारिणश्च सम्मिलिता: सन्ति। सिङ्गापुरस्य राष्ट्रपतित्वेन तस्य इयं प्रथमा भारतयात्रा भवेदिति। स्वीयप्रवासावधौ राष्ट्रपति: थर्मन् इत्येष: राष्ट्रपतिना द्रौपदीमुर्मु इत्यनया सह विचारविमर्शमपि समाचरिष्यति । प्रधानमन्त्री नरेन्द्रमोदी अपि सिङ्गापुरस्य राष्ट्रपतिना सह मन्त्रणां विधास्यति।

राष्ट्रपतिः थर्मन् इत्ययम् अस्य मासस्य सप्तदशदिनाङ्कतः अष्टादश दिनाङ्कं यावत् ओडिशायात्रां करिष्यति। राष्ट्रपतेः थर्मन इत्यस्य यात्रया उभयोः देशयोः मध्ये द्विपक्षीय-सम्बन्धेभ्यः इतोऽपि गतिं मिलिष्यति इति आशास्यते। अनया यात्रया भारत-सिङ्गापुर-देशयोः मध्ये राजनीति-सम्बद्धानां स्थापनायाः षष्टितमायाः वर्षसम्पूर्तेः समारोहस्यापि शुभारम्भो भविष्यति।

**।।इति वार्ताः।।**